M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 1536

Title: Trisati Stotra

1536

Incomplete

Trisati Stotra		Title
		Author
		Editor
Skt		Year, Vols.
		Publisher
1536		Remarks

॥श्रीगणेशंवागुरुभ्योनमः॥ अगस्तिरुवाच॥
हयग्रीवदयासिंधोभगवन्भक्तवत्सलः॥
त्वत्तःश्रुतमशेषेणश्रोतव्यंयद्यदस्तितत्॥१
रहस्यनामसाहस्रमपित्वत्संश्रुतंमया॥
इतःपरंमेनास्त्येवश्रोतव्यमितिनिश्चयः
॥२॥तथापिममचित्तस्यपर्याप्तिर्नैवजाय
ते॥कार्त्स्न्यार्थमप्राप्तइवशोच्ययात्मापिमे

११

प्रभो ॥ ३ ॥ किमिदंकारणंब्रूहि श्रोतव्यंशो
स्तिवापुनः ॥ अस्तिश्चेत्तरनुब्रूहिब्रूहिशु
श्रूकाप्रणम्यतां ॥ ४ ॥ समालंलंबेनपादयु
गुलंकलशोद्भवः ॥ हयाननोभीलभीतः
किमिदंकिमिदंत्विति ॥ ५ ॥ मुंचमुंचेति
तंत्वोत्काचिंताक्रांतोबभूवसः ॥ चिरंवि
चार्यनिश्चित्यनवक्तव्योमयेत्यसौ ॥ ६ ॥

तूष्णींस्थितःस्मरन्नाज्ञांललितांचारु
तांपुरा ॥ प्रणमन्नेवसमुनिस्तत्पादाब्
जंस्थितः ॥ ७ ॥ वर्षत्रयावधितदागुरु
शिष्यौतथास्थितौ ॥ तद्दृष्ट्वंतत्रपश्यंतः
सर्वेलोकाःसुविस्मिताः ॥ ८ ॥ ततःश्री
ललितादेवीकामेश्वरसमन्विता ॥ प्रादु
र्भूयहयग्रीवंरहस्येदमुवाचह ॥ ९ ॥ श्री

ललितोवाच॥आश्वाननावयोः प्रीतिः शा
स्त्रविश्वासतस्त्वयि॥राज्यंदेयंशिरोदेयं
नदेयाषोडशाक्षरी॥१०॥स्वमातृयोनि
वद्गोप्याविद्यैषेत्यागमाजितुः॥ततोपि
गोपनीयामेसर्वपूर्तिकरास्तुतिः॥११॥
मयाकामेश्वरेणापिकृतासागोपिताभृ
शं॥मयाज्ञयाचवाग्देव्यश्चक्रुर्नामस

हस्रकं॥१२॥अवाभ्यामार्चितंपुण्यंसर्वपूर्ति
करंस्तवं॥सर्वक्रियाणांवैकल्यपूर्तिर्यज्ज
पतोभवेत्॥१३॥सर्वपूर्तिकरंतस्मादिति
नामकृतंमया॥तद्ब्रूहित्वमगस्त्यायपात्र
मेषनसंशयः॥१४॥पत्नीचलोपमुद्राख्या
मामुपास्तेतिभक्तितः॥अयंचनितरांभक्त
तस्मादस्यवदस्वतत्॥१५॥अमुंचमानस्त

॥३

प्राप्तोवर्षत्रयमसौस्थितः॥एवंभक्तिमतो
ज्ञातुमिदमेवनिदर्शनं॥१६॥चित्तपर्योपि
रेतस्यनान्यथासंभविष्यति॥सर्वपूर्ति
करंतस्मादनुज्ञातोमयावद॥१७॥इत्यु
क्त्वांतर्दधेत्यंबाकामेश्वरसमन्विता॥अथो
त्थाप्यहयग्रीवःपाणिभ्यांकुंभसंभवं॥१८॥
संस्थाप्यनिकटेवाचमुवाचभृशविस्मि

तः॥कृतार्थोस्मिकृतार्थोस्मिकृतार्थोसि
घटोद्भव॥१९॥त्वत्समोललिताभक्तोना
स्तिनास्तिजगत्त्रये॥येनागस्त्यस्वयंदेवी
तववक्तव्यमन्वशात्॥२०॥सच्छिष्येणत्व
याहंद्रष्टवानस्मितांशिवां॥यतंतेदर्श
नायेब्रह्मविष्णुशपूर्वकाः॥२१॥अतः
परंतेवक्ष्यामिसर्वपूर्तिकरंस्तवं॥यस्यस्म

रणमात्रेणप्रयोगिस्तेभविष्यति॥२२॥
रहस्यनामसाहस्रादपिगुह्यतमंमुने।
आवश्यकंततोयेनललितास्तवंमुने॥
॥२३॥तदहंतेप्रवक्ष्यामिललितांबानु
शासनात्॥श्रीमत्पंचदश्याख्यार्याःकादि
वर्णक्रमान्मुने॥२४॥पृथग्विंशतिनामा
निकथितानिघटोद्भव॥आहत्यनाम्नांत्रि

शतीसर्वपूर्तिकरापि॥२५॥ रहस्यातिरह
स्यैषागोपनीयाप्रयत्नतः॥तांश्रृणुष्व
महाभक्त्यासावधानेनचेतसा॥२६॥
केवलंनामबुद्धिस्तेनकार्यातेषुकुंभज
मंत्रात्मकत्वमेतेषांनाम्नांनामात्मतापि
च॥२७॥तस्मादेकाग्रमनसाश्रोतव्यं
चत्वयासदा॥इत्युक्त्वातहितांहयग्रीवः
प्रोचेनाम्नांशतत्रयीं॥अस्यश्रीशि

त्री स्तोत्रनामामृतमंत्रस्य ॥ हयग्रीव
ऋषिः । अनुष्टुप्छंदः ॥ श्रीमहात्रिपुर
सुंदरी देवता बीजशक्ती कीलकं षडंग
चमूलेनकृत्वा ॥ ध्यानं ॥ अतिमधुरचा
पहस्तामपरिमितामोदबाणसौभा
ग्यां ॥ अरुणामतिशयकरुणामभि
नवकुलसुंदरीं वंदे । षडुपचारैः सं